# श्री भगवान का ध्यान

शान्ताकारं भुजगशयनं पद् मनाभं सुरेशं ,
विश्वाधारं गगन सदृशं मेघवर्णं शुभांगम् ।

लक्ष्मी कान्तम् कमलनयनं योगिभिर्ध्यानगम्यम् ,
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥१॥

सशंख-चक्र सकिरिटकुण्डलं ,
सपीतवस्त्रं सरसीरुहेक्षणम् ।

सहारवक्षः स्थलकौस्तुभश्रियं
नमामि विष्णुं शिरसा चतुर्भुजम् ॥२॥

हे राम ! पुरुषोत्तम नरहरे नारायणकेशव ,
गोविन्द गरुड़ध्वज गुणनिधे दामोदर माधव ।

हे कृष्ण कमलापते यदुपते सीतापते श्रीपते ,
वैकुण्ठाधिपते चराचरपते लक्ष्मीपते पाहिमम् ॥३॥

आदौ राम तपो वनादिगमनं हत्वा मृगं कांचनम् ,
वैदेही जटायु मरणं सुग्रीवसम्भाषणम् ।

बालिनिग्रहणं समुद्रतरणं लंकापुरीदाहनम् ,
पश्चाद्रावणकुम्भकर्ण हनन मेतद्धि रामायणम् ॥४॥

आदौ देवकी देवगर्भजननं गोपीगृहे वर्द्धनम् ,
मायापूतनजीवतापहरणं गोवर्द्धनं धारणम् ।

कंसाच्छेदन कौरवादिहननं कुन्तीसुतापालनम् ,
एतद् श्रीमद्भागवतपुराणकथितं श्रीकृष्णलीलामृतम् ॥५॥

वन्दे देव उमापति सुरगुरुं वन्दे जगत्कारणम् ,
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम् ।

वन्दे सूर्यशशांक वह्निनयनं वन्दे मुकुन्दप्रियम् ,
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शंकरम् ॥६॥

देवी प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य ,
प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य ॥७॥

अतुलितबलधामं हेमशैलाभहेतम् ,
दनुजवनकृशानुं ज्ञानीनामग्रगण्यम् ॥८॥

सकलगुणनिंधानम् वानराणामधीशं ।
रघुपतिप्रियभक्तं वातजातं नमामि ॥९॥

त्वमेव माता च पिता त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव, त्वमेव सर्वं मम देव-देव ॥१०॥